# ॥ समासचक्रम् ॥

षोढा समासः संक्षेपाद् अष्टाविंशतिधा पुनः । नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥ १ ॥

तत्राष्टधा तत्पुरूषः सप्तधा कर्मधारयः ।
सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा ॥ २ ॥

द्वन्द्वोऽपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः ।
तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् ॥ ३ ॥

चकारबहुलो द्वन्द्वः स चासौ कर्मधारयः ।
यस्य येषां बहुव्रीहिः शेषस्तत्पुरुषः स्मृतः ॥ ४ ॥

### ॥ प्रयोगाः पञ्चविधाः ॥

कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात्सकर्मकः ।
अकर्मकः कर्मशून्यः कर्मद्वन्द्वो द्विकर्मकः ॥ ५ ॥

सकर्मकप्रयोगो यथा – कृष्णो भक्तान् रक्षति ।

अकर्मकप्रयोगो यथा – कृष्णस्तिष्ठति ।

कर्मणिप्रयोगो यथा – विष्णुना प्रपञ्चः क्रियते ।

भावेप्रयोगो यथा – कृष्णेन क्रियते ।

# Circle of Compounds

Compounds can be classified in *six* ways, or alternatively in *eight.* There is a twofold distinction, according to whether they are *necessary* compounds or not, and according to whether they involve *elision*, or not, of the inflectional endings of the first word. In turn, there are:

- *seven* types of *tatpuruṣa*;
- *eight* types of *karmadhāraya*;
- *seven* types of *bahuvrīhi*;
- *two* types of *dvigu*;
- *two* types of *dvandva*;
- and *two* types of *avyayībhāva*.

Moreover there are *four* ways for a word to be the *head* of a compound. (1–3).

The analytic expressions of a *dvandva* involve the word *ca*; those of a *karmadhāraya*, the words *sa cāsau*; and those of a *bahuvrīhi*, *yasya* or *yēṣām*. The rest are *tatpuruṣa*s.

## Syntactic patterns

A syntactic pattern in which an agent and patient are employed with the verb is called *transitive* (*sakarmaka*). One in which there is no patient is called *intransitive* (*akarmaka*). One in which there are two patients is called *ditransitive* (*dvikarmaka*).

1. Transitive: “Kr̥ṣṇa protects his devotees”
2. Intransitive
   - *i.* Agentive (*kartari*): “Kr̥ṣṇa is standing.”
   - *ii.* Patientive (*karmaṇi*): “Creation is made by Viṣṇu.”
   - *iii.* Impersonal (*bhāvē*): “Doing is done by Kr̥ṣṇa.”

द्विकर्मकप्रयोगो यथा – (नृपः) धराम् अन्नं दुदोह।

॥ इति प्रयोगविधिः ॥

3. Ditransitive: "The king milks the earth [for] food."

॥ अथ समासविधिः ॥

समासाः षड्विधाः। तत्पुरुषः कर्मधारयो बहुव्रीहिर्द्विगुर्द्वन्द्वोऽव्ययीभावश्चेति भेदात्। तल्लक्षणानि तु–

पूर्वपदार्थप्रधानोऽव्ययीभावः।

उत्तरपदार्थप्रधानस्तत्पुरुषः।

उभयपदार्थप्रधानो द्वन्द्वः।

अन्यपदार्थप्रधानो बहुव्रीहिः।

द्विगुकर्मधारयौ तत्पुरुषभेदौ।

## Compounding rules

There are *six* types of compounds: (1) *tatpuruṣa*; (2) *karmadhāraya*; (3) *bahuvrīhi*; (4) *dvigu*; (5) *dvandva*; and (6) *avyayībhāva.* They are defined as follows:

- In an *avyayībhāva*, the *first word* is the head.
- In a *tatpuruṣa*, the *second word* is the head.
- In a *dvandva*, *both words* are the head.
- In a *bahuvrīhi*, a word *outside the compound* is the head.

The *dvigu* and *karmadhāraya* are types of *tatpuruṣa*.

## ॥ अथ तत्पुरुषः ॥

तत्राष्टधा तत्पुरुषक्रमः। प्रथमातत्पुरुषो द्वितीयातत्पुरुषस्तृतीयातत्पुरुषश्चतुर्थीतत्पुरुषः पञ्चमीतत्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषो नञ्तत्पुरुषश्चेति।

तत्र प्रथमातत्पुरुषो यथा–अर्धं पिप्पल्याः अर्धपिप्पली। पूर्वं कायस्य इति पूर्वकायः।

द्वितीयातत्पुरुषो यथा–कृष्णं श्रितः इति कृष्णश्रितः। ग्रामं गतो इति ग्रामगतः। कान्तारम् अतीतः इति कान्तारातीतः।

## *Tatpuruṣa*

There are eight types of *tatpuruṣa*: (1) first-case *tatpuruṣa*; (2) second-case *tatpuruṣa*; (3) third-case *tatpuruṣa*; (4) fourth-case *tatpuruṣa*; (5) fifth-case *tatpuruṣa*; (6) sixth-case *tatpuruṣa*; (7) seventh-case *tatpuruṣa*; (8) negative *tatpuruṣa*.

1. First-case *tatpuruṣa*
   - *ardhapippalī* "half a peppercorn"
   - *pūrvakāyaḥ* "the front part of the body"

2. Second-case *tatpuruṣa*
   - *kr̥ṣṇaśritaḥ* "gone to Kr̥ṣṇa for refuge"
   - *grāmagataḥ* "gone to the village"
   - *kāntārātītaḥ* "traversed the forest"

तृतीयातत्पुरुषो यथा—शङ्कुलया खण्डः इति शङ्कुलाखण्डः। धान्येन अर्थः इति धान्यार्थः।

3. Third-case *tatpuruṣa*
   - *śaṅkulākhaṇḍaḥ* “mutilated by scissors”
   - *dhānyārthaḥ* “rich in grain”

चतुर्थीतत्पुरुषो यथा—यूपाय दारु इति यूपदारु। कुण्डलाय हिरण्यम् इति कुण्डलहिरण्यम्। गुरवे दक्षिणा इति गुरुदक्षिणा।

4. Fourth-case *tatpuruṣa*
   - *yūpadāru* “wood for the sacrificial post”
   - *kuṇḍalahiraṇyam* “gold for an earring”
   - *gurudakṣiṇā* “payment to a teacher”

पञ्चमीतत्पुरुषो यथा—अर्थात् अपेतः इति अर्थापेतः। सिंहात् भयम् इति सिंहभयम्। वृश्चिकात् भीः इति वृश्चिकभीः।

5. Fifth-case *tatpuruṣa*
   - *arthāpētaḥ* “devoid of wealth”
   - *siṁhabhayam* “fear of lions”
   - *vr̥ścikabhīḥ* “fear of scorpions”

षष्ठीतत्पुरुषो यथा—कृष्णस्य भक्तः इति कृष्णभक्तः। आम्रस्य फलम् इति आम्रफलम्। राज्ञः पुरुषः इति राजपुरुषः।

6. Sixth-case *tatpuruṣa*
   - *kr̥ṣṇabhaktaḥ* “devotee of Kr̥ṣṇa”
   - *āmraphalam* “fruit of a mango tree”
   - *rājapuruṣaḥ* “the king’s man”

सप्तमीतत्पुरुषो यथा—अक्षेषु शौण्डः इति अक्षशौण्डः। कर्मणि कुशलम् इति कर्मकुशलः। विद्यायां निपुणः इति विद्यानिपुणः।

7. Seventh-case *tatpuruṣa*
   - *akṣaśauṇḍaḥ* “skilled at dice”
   - *karmakuśalaḥ* “well-versed in ritual”
   - *vidyānipuṇaḥ* “clever in the sciences”

नञ् तत्पुरुषो यथा—न ब्राह्मणः इति अब्राह्मणः। न वृषभः इति अवृषभः। पापाभावः इति अपापम्। धर्मविरुद्धः इति अधर्मः।

8. Negative *tatpuruṣa*
   - *abrāhmaṇaḥ* “a non-Brahmin”
   - *avr̥ṣabhaḥ* “a non-bull”
   - *apāpam* “absence of sin”
   - *adharmaḥ* “contrary to *dharma*”

॥ इति तत्पुरुषः ॥

॥ अथ कर्मधारयः ॥

स च विशेषणपूर्वपदो विशेष्यपूर्वपदो विशेषणोभयपद उपमानपूर्वपद उपमानोत्तरपदः सम्भावनापूर्वपदोऽवधारणापूर्वपदश्चेति भेदात् सप्तविधः ।

## *Karmadhāraya*

There are seven types of *karmadhāraya*: (1) the first word is a qualifier of the second; (2)the first word is qualified by the second; (3) both words are qualifiers; (4) the first word is a standard of comparison; (5) the second word is a standard of comparison; (6) the first word expresses a consideration; (7) the first word expresses a determination.

---

तत्र विशेषणपूर्वपदः कर्मधारयो यथा–कृष्णश्चासौ सर्पश्च कृष्णसर्पः । कृष्णौ च तौ सर्पौ च कृष्णसर्पौ । कृष्णाश्च ते सर्पाः कृष्णसर्पाः । रक्ता चासौ लता च रक्तलता । रक्ते च ते लते च रक्तलते । रक्ताश्च ताः लताश्च रक्तलताः । नीलं च तत् उत्पलं च नीलोत्पलम् । नीले च ते उत्पले च नीलोत्पले । नीलानि च तानि उत्पलानि च नीलोत्पलानि ।

1. The first word is a qualifier of the second
   - *kr̥ṣṇasarpaḥ* “a black snake”
   - *raktalatā* “a red vine”
   - *nīlōtpalam* “a blue lotus”

विशेष्यपूर्वपदः कर्मधारयो यथा–वैयाकरणश्चासौ खसूचिश्च वैयाकरणसूचिः । गोपालश्चासौ बालश्च इति गोपालबालः ।

2. The first word is qualified by the second
   - *vaiyākaraṇasūciḥ* “a needle of a grammarian”
   - *gōpālabālaḥ* “a young cowherd”

विशेषणोभयपदः कर्मधारयो यथा–शीतं च तत् उष्णं च इति शीतोष्णम् ।

3. Both words are qualifiers
   - *śītōṣṇam* “cold and hot”

उपमानपूर्वपदः कर्मधारयो यथा–मेघ इव श्यामो मेघश्यामः । कम्बुवत् ग्रीवा कम्बुग्रीवा । चन्द्रवत् मुखम् चन्द्रमुखम् ।

4. The first word is a standard of comparison
   - *mēghaśyāmaḥ* “cloud-black; black as a cloud”
   - *kambugrīvaḥ* “conch-neck; a neck that is like a conch”
   - *candramukham* “moon-face; a face that is like the moon”

उपमानोत्तरपदः कर्मधारयो यथा–पुरुषः व्याघ्र इव पुरुषव्याघ्रः । नरः सिंह इव नरसिंहः ।

5. The second word is a standard of comparison
   - *puruṣavyāghraḥ* “man-tiger; a man who is like a tiger”
   - *narasiṁhaḥ* “man-lion; a man who is like a lion”

सम्भावनापूर्वपदः कर्मधारयो यथा–गुण इति बुद्धिः गुणबुद्धिः ।

6. The first word expresses a consideration
    - *guṇabuddhiḥ* “the cognition ‘quality’”

अवधारणापूर्वपदः कर्मधारयो यथा–विद्यैव धनं विद्याधनम् । अविद्यैव शृङ्खला अविद्याशृङ्खला ।

7. The first word expresses a determination
    - *vidyādhanam* “the wealth that is knowledge”
    - *avidyāśṛṅkhalā* “the shackle that is ignorance”

मध्यमपदलोपी समासो यथा–शाकप्रियः पार्थिवः शाकपार्थिवः । देवपूजको ब्राह्मणः देवब्राह्मणः ।

Also considerd *karmadhāraya* are compounds in which a word is omitted between the first and second word, like *śākapārthivaḥ* “vegetable-king” (a king who is fond of vegetables) and *dēvabrāhmaṇaḥ* “god-brahmin” (a brahmin who worships gods).

॥ इति कर्मधारयः ॥

॥ अथ बहुव्रीहिः ॥

## *Bahuvrīhi*

स च द्विपदो, बहुपदः सहपूर्वपदः संख्योत्तरपदः, संख्योभयपदो, व्यतिहारलक्षणो, दिगन्तराललक्षणश्चेति भेदात् सप्तविधः ।

There are seven types: (1) two words; (2) multiple words; (3) *saha* is the first word; (4) a number is the first word; (5) a number is the second word; (6) characterized by reciprocity; and (7) characterized by the intermediate space between cardinal directions.

तत्र द्विपदबहुव्रीहिर्यथा–

चित्राः गावो यस्य सः चित्रगुः गोपः ।

प्राप्तम् उदकं येन सः प्राप्तोदको ग्रामः ।

भुक्तम् ओदनं येन सः भुक्तौदनो राजा ।

निर्जितः कामः येन स निर्जितकामः शिवः ।

विभक्तं धनं यैस्ते विभक्तधना बन्धवः ।

1. Two words
    - *citraguḥ* “[a cowherd] who has a brindled cow”
        - The head is a possessor (*yasya*)
    - *prāptōdakaḥ* “[a village] that has obtained water”
        - The head is an agent (*yēna*)
    - *bhuktaudanaḥ* “[a king] by whom rice has been eaten”
        - The head is an agent (*yēna*)
    - *nirjitakāmaḥ* “[Śiva] by whom Kāmadēva has been conquered”
        - The head is an agent (*yēna*)
    - *vibhaktadhanā* “[relatives] by whom property has been divided”
        - The head is an agent (*yaiḥ*)

दत्तः सूपो यस्मै सः दत्तसूपो ब्राह्मणः ।

उद्धृतम् धनं यस्मात्तत् उद्धृतधनं कुण्डम् ।

चक्रं पाणौ यस्य सः चक्रपाणिः हरिः ।

करे स्थितं धनं यस्य सः करस्थितधनो वणिक् ।

पुष्पिताः द्रुमाः यस्मिन् सः पुष्पितद्रुमः आरामः ।

बहवो यज्वानो यस्यां सा बहुयज्वा शाला ।

पुष्पिताः द्रुमाः यस्मित् तत् पुष्पितद्रुमं वनम् ।

खरस्य मुखमिव मुखं यस्य सः खरमुखः तुरगः ।

उष्ट्रस्य मुखमिव मुखं यस्य सः उष्ट्रमुखो यक्षः ।

उच्चैर्घटो यस्याः सा उच्चैर्घटा नारी ।

- *dattasūpaḥ* "[a brahmin] to whom soup has been given"
  - The head is a recipient (*yasmai*)
- *uddhr̥tadhanam* "[a bowl] from which grain has been taken"
  - The head is the source (*yasmāt*)
- *cakrapāṇiḥ* "[Viṣṇu] in whose hand is a discus"
  - The head is a possessor (*yasya*)
- *karasthitadhanaḥ* "[a merchant] whose wealth is in hand"
  - The head is a possessor (*yasya*)
- *puṣpitadrumaḥ* "[a garden] in which the trees have flowered"
  - The head is a locus (*yasmin*)
- *bahuyajvā* "[a hall] in which there are many sacrificers"
  - The head is a locus (*yasyām*)
- *puṣpitadrumam* "[a grove] in which the trees have flowered"
  - The head is a locus (*yasmin*)
- *kharamukhaḥ* "[a horse] whose face is [like the face of] a donkey"
- *uṣṭramukhaḥ* "[a *yakṣa*] whose face is [like the face of] a camel"
- *uccairghaṭā* "[a woman] whose pot is [held] up high"

अङ्गगात्रोदरस्तनकण्ठौष्ठदन्तमुखाक्षिकेशाः स्त्रियां बहुव्रीहो ईबन्ता भवन्ति । ते च यथा–

The words *aṅga*- n. "body," *gātra*- n. "body," *udara*- n. "belly," *stana*- m. "breast," *kaṇṭha*- m. "throat," *ōṣṭha*- m. "lip," *danta*- n. "tooth," *mukha*- n. "face," *akṣi*- n. "eye," and *kēśa*- m. "hair" all take the suffix *īP* in the feminine in *bahuvrīhi* compounds.

सुन्दरम् अङ्गं यस्याः सा सुन्दराङ्गी ।

शोभनं गात्रं यस्याः सा सुगात्री ।

कृशम् उदरं यस्याः सा कृशोदरी ।

चारू स्तनौ यस्याः सा चारूस्तनी ।

इन्दीवरे इव अक्षिणि यस्याः सा इन्दीवराक्षी ।

कम्बुरिव कण्ठो यस्याः सा कम्बुकण्ठी ।

- *sundarāṅgī* "[a woman] whose body is beautiful"
- *sugātrī* "[a woman] whose body is beautiful"
- *kr̥śōdarī* "[a woman] whose waist is thin"
- *cārustanī* "[a woman] whose breasts are attractive"
- *indīvarākṣī* "[a woman] whose eyes are like blue lotuses"
- *kambukaṇṭhī* "[a woman] whose neck is like a conch"

कुटिलाः केशाः यस्याः सा कुटिलकेशी।

इतरेषाम् अङ्गादिवाचकानाम् स्त्रीत्वेऽपि आबन्त्वमेव। चारूदेहा, विस्तृतालका, आवृतकुचा, कुन्ददशना इत्यादि। उरु-पृथु-बहु-पटु-ऋजु-स्वादु-चारू-मृदु-शब्दानां त्रीलिङ्गविशेषणत्वे ईबन्तत्वमपि यथा मृद्वी शाटी, लघ्वी भाषा इत्यादि।

॥ इति द्विपदबहुव्रीहिः ॥

- *kuṭilakēśī* "[a woman] whose hair is curly"

Other words that express the same meanings take the suffix *āP*.

- *cārudēhā* "[a woman] whose body is attractive"
- *vistr̥tālakā* "[a woman] whose hair is disheveled"
- *āvr̥takucā* "[a woman] whose breasts are concealed"
- *kundadaśanā* "[a woman] whose teeth are like jasmine flowers"

The adjectives *uru-* "broad," *pr̥thu-* "wide," *bahu-* "much," *paṭu-* "sharp," *r̥ju-* "straight," *svādu-* "sweet," *cāru-* "attractive," *mr̥du-* "soft" also take the suffix *īP* when they qualify feminine nouns, as in *mr̥dvī śāṭī* "a soft saree," *laghvī bhāṣā* "fast speech."

---

बहुपदो यथा–अधिकः उन्नतः अंसो यस्य सः अधिकोन्नतांसः।

सहपूर्वपदो यथा–सह कृष्णेन वर्तत इति सकृष्णः। सह पुत्रेण इति सपुत्रः। रामेण सह वर्तत इति सरामः।

संख्योत्तरपदो यथा–दशानां समीपे ये सन्ति, ते उपदशाः।

संख्योभयपदो यथा–द्वौ वा त्रयो वा द्वित्राः।

व्यतिहारलक्षणो यथा–केशेषु केशेषु गृहीत्वा इदम् युद्धम् प्रवृत्तम् इति केशाकेशि युद्धम्। दण्डैर्दण्डैः कृत्वा इदम् युद्धं प्रवृत्तम् इति दण्डादण्डि।

दिगन्तराललक्षणो यथा–दक्षिणस्याः पूर्वस्याश्च दिशो यद् अन्तरालम् सा दक्षिणपूर्वा।

॥ इति बहुव्रीहिः ॥

---

2. Multiple words
   - *adhikōnnatāṁsaḥ* "[a man] whose shoulders are large and tall"
3. *Saha* is the first word
   - *sakr̥ṣṇaḥ* "[Balarāma] with Kr̥ṣṇa"
   - *saputraḥ* "[a father] with his son"
   - *sarāmaḥ* "[Lakṣmaṇa] with Rāma"
4. A number is the second word
   - *upadaśāḥ* "[people] that number about ten"
5. Both words are numbers
   - *dvitrāḥ* "[people] that number two or three"
6. Characterized by reciprocity
   - *kēśākēśi* "[a battle] in which people grasped each other by the hair"
   - *daṇḍādaṇḍi* "[a battle] in which people hit each other with staffs"
7. Characterized by the intermediate space between cardinal directions
   - *dakṣiṇapūrvā* "southeast; [the direction] between south and east,"

॥ अथ द्विगुः ॥

द्विगुसमासो द्विविधः—एकवद्भावी अनेकवद्भावी चेति।

एकवद्भावी द्विगुर्यथा—त्रयाणां शृङ्गाणां समाहारः त्रिशृङ्गम्।

पञ्चानां फलानां समाहारः पञ्चफली॥ अनेकवद्भावी द्विगुर्यथा - सप्त च ते ऋषयश्च सप्तर्षयः॥

॥ इति द्विगुः ॥

## *Dvigu*

There are two types of *dvigu*: (1)

1. Single
   - *triśr̥ṅgam* "[a collection] of three peaks"
   - *pañcaphalī* "[a collection] of five fruits"
2. Multiple
   - *saptarṣayaḥ* "the seven sages"

॥ अथ द्वन्द्वः ॥

द्वन्द्वो हि द्विविधः। इतरेतरयोगसमाहारभेदात्।

इततेतरयोगद्वन्द्वो यथा—प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ। रामश्च कृष्णश्च रामकृष्णौ।

समाहारद्वन्द्वो यथा—हरिश्च हरश्च गुरुश्च एषां समाहारः हरिहरगुरु।

प्राणितूर्यसेनाङ्गानां द्वन्द्वैकवद्भावः।

प्राण्यङ्गे यथा—पाणी च पादौ च मुखं च पाणिपादमुखम्।

तूर्याङ्गे यथा—मार्दङ्गिकं वैणविकश्च मार्दङ्गिकवैणविकम्।

सेनाङ्गे यथा—राजन्याश्च रथाश्च अश्वाश्च राजन्यरथाश्वम्।

॥ इति द्वन्द्वः ॥

## *Dvandva*

There are two types of *dvandva*: (1) *countable* (*itarētaraḥ*) and (2) *collective* (*samāhāraḥ*).

1. Countable
   - *plakṣanyagrōdhau* "the *plakṣa* and *nyagrōdha* trees"
   - *rāmakr̥ṣṇau* "Rāma and Kr̥ṣṇa"
2. Collective
   - *hariharaguru* "Hari, Hara, and Guru"

Parts of the body, parts of a musical ensemble, and parts of armies are collective.

- *pāṇipādamukham* "the hands, feet, and face"
- *mārdaṅgikavaiṇavikam* "the *mr̥daṅga* player and the *vēṇu* player"
- *rājanyarathāśvam* "the princes, chariots, and horses"

॥ अथाऽव्ययीभावः ॥

स यथा – तटं तटं प्रति अनुतटम् । गिरिं गिरिं प्रति अनुगिरि । क्रमम् अनतिक्रम्य वर्तत इति यथाक्रमम् । वेलायाम् इति अधिवेलम् । कुम्भस्य समीपे वर्तते इति उपकुम्भम् । मक्षिकाणाम् अभावो निर्मक्षिकम् । हिमस्य अत्ययः अतिहिमम् । अव्ययीभावस्य अव्ययत्वात् त्रिषु लिङ्गेषु समानं रूपम् । इति षट् समासा निर्णीताः ॥

## *Avyayībhāva*

- *anutaṭam* “at every bank”
- *anigiri* “at every mountain”
- *yathākramam* “in sequence”
- *adhivēlam* “on the shore”
- *upakumbham* “near the jar”
- *nirmakṣikam* “without mosquitoes”
- *atihimam* “after the forst”

*Avyayībhāva* compounds are indeclinable and have the same form in all genders.

॥ अथ अलुक्समासो लुक्समासश्च ॥

लुक्समासो यथा – तनुरेव लता तनुलता । कृष्णा एव मेघाः कृष्णमेघाः ।

अलुक्समासो यथा – वने चरति इति वनेचरः । पङ्के रोहतीति पङ्केरुहम् ॥

## Compounds with and without elision of the inflectional ending

1. With elision
   - *tanulatā* “vine that is a body”
   - *kr̥ṣṇamēghaḥ* “cloud that is black”
2. Without elision
   - *vanēcaraḥ* “roaming in the forest”
   - *paṅkēruham* “growing in the mud”

वृक्षशाखा तत्पुरुषः श्वेताश्वः कर्मधारयः ।
रक्तवस्त्रो बहुव्रीहिर्द्वन्द्वश्चन्द्रदिवाकरौ ॥ ६ ॥

*Vr̥kṣaśākhā* (“tree-branch”) is a *tatpuruṣa.*
*Śvētāśvaḥ* (“white-horse”) is a *karmadhāraya.*
*Raktavastraḥ* (“red-robed”) is a *bahuvrīhiḥ.*
*Candradivākarau* (“moon-sun”) is a *dvandva.*

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।
तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ॥ ७ ॥

A *qualifier* has the same *gender*, *number*, and *case* as that which is qualifies.

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ ८ ॥

That which does not modify its form for any of the three genders, for any of the cases, and for any of the numbers is an *indeclinable*.

आदौ कर्तृपदं वाच्यं द्वितीयादिपदं ततः ।
क्त्वातुमुन्ल्यप्च मध्ये कुर्यादन्ते क्रियापदम् ॥ ९ ॥

The agent should be explained first, and then the remaining nominal cases. Then the indeclinable verbal forms (*Ktvā*, *tumUN*, *LyaP*), and finally the verb.

॥ इति समासचक्रं समाप्तम् ॥